**धियसान** त्रि० धि—धारणे वेदे बा० असानच् कित्च। धारके "स त्वं न इन्द्र धियसानः" ऋ०५।३३।२ "धियसानः धारयन्" भा०।

**धियाम्पति** पु० ६त० अलुक्समा०। बृहस्पतौ त्रिका०।

**धियायत्** त्रि०ई—कान्तौ (इच्छायाम्) शतृ यन् ३त० छान्दसः अलुक्समा०। कर्मणा इच्छति "एष पुरु धियायते बृहते देवतातये" ऋ० ८।१५।२ "धियायते कर्मणा इच्छते द्वितीयार्थे तृतीयायाः छान्दसोऽलुक्" भा०।

**धियायु** त्रि०धि—धारणे धीयते ज्ञायते अनया धि—बा० करणे क्विप् धिया तां प्रज्ञामात्मनः इच्छति क्यच् "क्याच्छन्दसि" पा०उ। आत्मनः प्रज्ञाकामयोगे। "विप्रासो वा धियायवः" ऋ० १।८।६।

**धियावसु** त्रि०धिया कर्मणा वसु यस्मात् वेदे अलुक्स०। कर्मणा वसुनिमित्ते देवभेदे सरस्वतीरूपा देवतैव धियावसुः। "यज्ञं वष्टु धियावसुः" ऋ०१।३।१० "कर्महेतुधननिमित्तभूताया वाग्देवतायास्तथाविधं धननिमित्तत्वमारण्यककाण्डे "वाग्वै धियावसुः" श्रुत्या व्याख्यातम्" भा०।

**धिव** प्रीणने गतौ च सक० स्वा० पर० सेट् इदित् सार्वधातुके धिः आदेशः। धिनोति अधिन्वीत् दिधिन्व। इदित् धिन्व्यते। "धान्यमसि धिनुहि देवान्" यजु०१।२० "मर्गन्टद्विगीं रुधिरैर्धिनोमि" प्रबोधच०। "धिनोति नास्मान् जलजेन पूजा" नैष०।

**धिष** रवे जु० पर० अक० सेट्। दिधेष्टि अधेषीत् दिधेष। वैदिकोऽयम्। "स्तरीँस्सिद्यदि धिषा वेषि जनान्" ऋ० १।१७३।८ "धिषा यदि धिषण्यन्तः सरण्यान्त्सदन्तो अद्रिमौशिजस्य गोहे" ऋ० ४।२१।६।

**धिषण** पु०धृष्णोति धृष—"धृषेर्धिष च संज्ञायाम्" उणा०क्यु। १बृहस्पतौ। धृष्णोत्यनया करणे ल्यु। २बुद्धौ स्त्री अमरः "पराय धिषणाभ्यः" ऋ० ८।५९।२। "आर्य्यपुत्रार्य्यधिषण! प्राणनाथ! शुभव्रत" काशीख० १० अ०। ३स्तुतौ ४वाचि ५पृथिव्याञ्च निघ० ६स्थाने च "तदा विकुण्ठधिषणात्तयोर्निपतमानयोः" भाग० ३।१६।३२। "ये पारमेष्ठ्यं धिषणमधितिष्ठन्न कञ्चन प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः" भाग०६।७।१२।

**धिषणाधिप** पु० ६त०। १वाक्पतौ सुराचार्य्ये मत्स्यपु०

**धिषण्य** धिषणामिच्छति क्यच् छान्दसदीर्घाभावेऽल्लोपः आत्मनःस्तुतीच्छौ अक०प०सेट्। धिषण्यति अधिषण्यीत् "धिषा यदि धिषण्यन्तः" ऋ०४।२१।६

**धिष्ण्य** न० धिष—ण्य उणा० नि०। धिष्णयशब्दार्थे मुकुटः

**धिष्णय** न० धिष—"सानसिवर्णसीत्यादि" उणा० नि०। १स्थाने २गृहे ३नक्षत्रे च अमरः ४अग्नौ ५शक्तौ च पु० मेदि०। ६शुक्राचार्य्ये। तत्र स्थाने "न भौमान्येव धिष्ण्यानि हित्वा ज्योतिर्मयान्यपि" रघुः। "स्वर्गे लोके ध्रुवतां नास्ति धिष्ण्यम्" भा० महा० ३ अ०। नक्षत्रे "भवन्त्यतीतधिष्ण्यानां भोगलिप्तायुता ध्रुवाः" सू०सि०। ७प्राणाभिमानिदेवे च "देवा उचिषे धिष्ण्या ये" ऋ०३।२२।३ "धियं बुद्ध्यु पहितं देहमुष्णन्ति उष्णीकुर्वन्ति धिषण्याः प्राणाभिमानिनो देवाः उष—दाहे "सानसिवर्णसीत्यादि" उणा० नि० यत् णडागमः धात्वादिलोपोपपदह्रस्वाः" भा० धिष्ण्यं स्थानमर्हति यत् यल्लोपाल्लोपौ। ८स्थानार्हे स्तुत्ये त्रि०। "को धिष्ण्यां प्रति वाकं पपाद" ऋ०१०।११४।९ "धिषणार्हे स्तुत्यर्हे" भा० स्तुत्यस्य स्थानार्हत्वात् तथात्वम्। "आविवासन् रोदसी धिष्ण्ये मे" ऋ० ७।७२।३। "रोदसी धिष्ण्ये धिषणार्हे स्तुत्ये" भा०। उष—दाहे इति धात्वर्थानुगमात्। १०उल्काभेदे स्त्री बृ० स० ३३अ० "दिवि भुक्तशुभफलानां पततां रूपाणि यानि तान्युल्काः। धिष्ण्योल्काशनिविद्युत्तारा इति पञ्चधा भिन्नाः"। "उल्का पक्षेण फलं तद्वद्धिष्ण्याशनिस्त्रिभिः पक्षैः"। "तारा फलपादकरी फलार्धदात्री प्रकीर्त्तिता धिष्ण्या" सा च "धिष्ण्या कृशाल्पपुच्छा धनूंषि दश दृश्यतेऽन्तराभ्यधिकम्। ज्वलिताङ्गारनिकाशा द्वौ हस्तौ सा प्रमाणेन" लक्षिता।

**धी** अनादरे आराधने च दिवा० आत्म० सक० अनिट्। धीयते अधेष्ट। दिध्ये ओदित् धीनः। "सत्यं परं धीमहि" भाग०१।१।१ कातन्त्रमतेऽस्य ओदित्त्वं नास्ति धीत इति। वेदे तु न ओदित् "धीतः विश्वान्यश्विना युवं प्रधीतान्यगच्छतम्" ऋ०८।८।१० "सन्धीयते संधीतमश्रुतम्" ८।४०।३। आधारे अक०इत्यन्ये।

**धी** स्त्री ध्यै सम्प० भावे—क्विप् संप्रसारणञ्च। १बुद्धौ ज्ञाने अमरः। "प्रसीद कथयात्मानं न धियां पथि। वर्त्तसे" कुमा०। २ज्ञानसङ्क्षिभेदे "तत्रात्मानं धिया नश्येदाभासात्तु घटः स्फुरेत्" वेदान्त० "धियो योनः प्रचोदयात्" गायत्री सा च न्यायनये आत्मवृत्तिः। "बुद्ध्यादि षट्कं संख्यादिपञ्चकं भावना तथा। धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश" भाषा०। वेदान्तमते